केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
अन्ताराष्ट्रियं गीता-ओलम्पियाड्

सरलस्तरे अभ्यासाय प्रश्नपत्रम्

पूर्णांकाः – 100 (50×02 = 100) समयः – 01 घण्टा

सर्वेऽपि प्रश्नाः समाधेयाः ।

1. धर्मक्षेत्रे कुरुक्षेत्रे... अस्मिन् श्लोके मामकाः इति के ?
   (क) पाण्डवाः (ख) कौरवाः
   (ग) यादवाः (घ) सर्वे

2. सुमेलनं कुरुत –
   १. दशमोऽध्यायः - (अ) मोक्षसंन्यासयोगः
   २. अष्टादशोध्यायः - (इ) सांख्ययोगः
   ३. पञ्चदशोऽध्यायः - (उ) विभूतियोगः
   ४. द्वितीयोध्यायः - (ऋ) पुरुषोत्तमयोगः
   (क) १-उ, २-इ, ३-अ, ४-ऋ (ख) १-उ, २-इ, ३-ऋ, ४-अ
   (ग) १-उ, २-ऋ, ३-अ, ४-इ (घ) १-उ, २-अ, ३-ऋ, ४-इ

3. रिक्तस्थानेषु पूरकपदानां समुचितः क्रमः कः?
   क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
   क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ .....।।

   (क) परन्तप (ख) धनञ्जय
   (ग) भारत (घ) पाण्डव

4. केषु पण्डिताः न अनुशोचन्ति?
   (क) गतासून् । (ख) अगतासून् ।
   (ग) गतासूनगतासूंश्च (घ) नूतनेषु ।

5. देहिनोऽस्मिन्यथा देहे .....।
   तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ।।
   (क) यौवनं कौमारं जरा (ख) यौवनं जीवनं जरा
   (ग) जीवनं यौवनं जरा (घ) कौमारं यौवनं जरा

6. कुरुक्षेत्रं नाम किम्?

(क) अर्थक्षेत्रम् (ख) वन्यक्षेत्रम्

(ग) धर्मक्षेत्रम् (घ) शिक्षाक्षेत्रम् ।

7. पुरुषोत्तमयोगो वर्णितः अस्ति?

(क) पञ्चदशे अध्याये (ख) द्वादशे अध्याये

(ग) अष्टादशे अध्याये (घ) एकादशे अध्याये

8. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि उपलभ्यते?

(क) वनपर्वणि (ख) भीष्मपर्वणि

(ग) द्रोणपर्वणि (घ) शान्तिपर्वणि

9. श्रीमद्भगवद्गीतायाः द्वादशे अध्याये कति श्लोकाः सन्ति?

(क) 20 (ख) 17

(ग) 30 (घ) 27

10. शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् इति कः कस्मै वदति?

(क) कृष्णः अर्जुनाय (ख) सञ्जयः धृतराष्ट्राय

(ग) अर्जुनः कृष्णाय (घ) दुर्योधनः द्रोणाय

11. के न अनुशोचन्ति?

(क) कौरवाः (ख) पाण्डवाः

(ग) पण्डिताः (घ) अविवेकिनः

12. कर्मणि कः मास्तु इति भगवान् उपदिशति?

(क) सङ्गः (ख) योगः

(ग) विरागः (घ) विवेकः

13. धनञ्जय इति पदेन कः सम्बोधितः?

(क) श्रीकृष्णः (ख) अर्जुनः

(ग) सञ्जयः (घ) धृतराष्ट्रः

14. सुमेलनं कुरुत –

१. भवन्ति भावा भूतानां मत्त एव ... - (अ) पञ्चमे अध्याये

२. विद्याविनयसम्पन्ने .... - (इ) सप्तदशे अध्याये

३. समः शत्रौ च मित्रे च .... - (उ) दशमे अध्याये

४. अनुद्वेगकरं वाक्यं .... - (ऋ) द्वादशे अध्याये

(क) १-उ, २-इ, ३-अ, ४-ऋ (ख) १-उ, २-अ, ३-ऋ, ४-इ

(ग) १-उ, २-ऋ, ३-अ, ४-इ (घ) १-उ, २-इ, ३-ऋ, ४-अ

15. कथं कर्म कर्तव्यम्?

(क) सिद्ध्यसिद्ध्योः समो भूत्वा (ख) भोगाभोगयोः समो भूत्वा

(ग) रागद्वेषयोः समो भूत्वा (घ) शोकमोहयोः समो भूत्वा

16. धर्मसंस्थापनार्थाय ..... सम्भवामि युगे युगे -

(क) संवदामि (ख) सम्भवामि

(ग) संविशामि (घ) सन्त्यजामि

17. सर्वं कर्माखिलं कुत्र परिसमाप्यते?

(क) ज्ञाने (ख) यागे

(ग) प्राणे (घ) यागे

18. तत्त्वदर्शिनः के ?

(क) कर्मिणः (ख) योगिनः

(ग) ज्ञानिनः (घ) भोगिनः

19. ..... हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।

(क) चञ्चलं (ख) निर्मलं

(ग) दुर्लभं (घ) स्थिरं

20. ..... कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ।

(क) ज्ञानार्थमपि (ख) धनार्थमपि

(ग) मदर्थमपि (घ) भोगार्थमपि

21. पार्थ इत्यनेन पदेन कः सम्बोधितः?

(क) श्रीकृष्णः (ख) अर्जुनः

(ग) सञ्जयः (घ) धृतराष्ट्रः

22. सुमेलनं कुरुत –

१. प्रथमोऽध्यायः - (अ) भक्तियोगः

२. द्वादशोध्यायः - (इ) कर्मयोगः

३. पञ्चदशोऽध्यायः - (उ) अर्जुनविषादयोगः

४. तृतीयोध्यायः - (ऋ) पुरुषोत्तमयोगः

(क) १-उ, २-इ, ३-अ, ४-ऋ (ख) १-उ, २-इ, ३-ऋ, ४-अ

(ग) १-उ, २-ऋ, ३-अ, ४-इ (घ) १-उ, २-अ, ३-ऋ, ४-इ

23. रिक्तस्थानेषु पूरकपदानां समुचितः क्रमः कः?

विद्याविनयसंपन्ने ..... गवि .....।

..... चैव श्वपाके च ..... समदर्शिनः॥

(क) ब्राह्मणे, हस्तिनि, शुनि, पण्डिताः (ख) ब्राह्मणे, पण्डिताः, हस्तिनि, शुनि

(ग) पण्डिताः, ब्राह्मणे, हस्तिनि,शुनि (घ) हस्तिनि, ब्राह्मणे, पण्डिताः, शुनि

24. तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।

कर्मिभ्यश्चाधिको योगी ..... ॥

(क) तस्माद्भोगी भवार्जुन। (ख) कस्माद्योगी भवार्जुन।

(ग) तस्माद्योगी भवार्जुन (घ) यस्माद्भोगी भवार्जुन।

25. गीताजयन्ती कदा आचर्यते?

(क) श्रावणशुक्लपूर्णिमायाम् (ख) श्रावणशुक्लपञ्चम्याम्

(ग) कार्त्तिकशुक्लपूर्णिमायाम् (घ) मार्गशीर्षशुक्लैकादश्याम्

26. तद्विद्धि प्रणिपातेन ....., सेवया।

(क) अभिप्रायेण (ख) अभिसङ्गेन

(ग) परिप्रश्नेन (घ) परितापेन।

27. भक्तियोगो वर्णितः अस्ति?

(क) पञ्चदशे अध्याये (ख) द्वादशे अध्याये

(ग) अष्टादशे अध्याये (घ) एकादशे अध्याये

28. पवनः पवतामस्मि ..... शस्त्रभृतामहम्।

(क) कामः (ख) रामः

(ग) पार्थः (घ) इन्द्रः

29. श्रीमद्भगवद्गीतायां कति श्लोकाः सन्ति?

(क) 700 (ख) 1700

(ग) 7700 (घ) 770

30. पुरुषार्थाः कति?

(क) चत्वारः (ख) पञ्च

(ग) सप्त (घ) अष्ट

31 श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति?

(क) पञ्च (ख) त्रयस्त्रिंशत्

(ग) सप्त (घ) अष्टादश

32. गुणत्रयविभागयोगः कस्मिन् अध्यायेवर्णितः?

(क) चतुर्दशे (ख) चतुर्थे

(ग) पञ्चदशे (घ) नवमे

33. अच्युत इति पदेन कः सम्बोधितः?

(क) श्रीकृष्णः (ख) अर्जुनः

(ग) सञ्जयः (घ) धृतराष्ट्रः

34. सुमेलनं कुरुत –

१. यत्र योगेश्वरः कृष्णो ... - (अ) पञ्चदशे अध्याये

२. ऊर्ध्वमूलमधःशाखम् .... - (इ) अष्टमे अध्याये

३. वेदानां सामवेदोऽस्मि .... - (उ) अष्टादशे अध्याये

४. ओमित्येकाक्षरं ब्रह्म .... - (ऋ) दशमे अध्याये

(क) १-उ, २-इ, ३-अ, ४-ऋ (ख) १-उ, २-इ, ३-ऋ, ४-अ

(ग) १-उ, २-ऋ, ३-अ, ४-इ (घ) १-उ, २-अ, ३-ऋ, ४-इ

35. अर्जुनस्य सम्बोधनं विद्यते -

(क) मधुसूदन (ख) भारत

(ग) केशव (घ) जनार्दन

36. गीताशब्दस्य सप्तमीविभक्ति-बहुवचने रूपम् -

(क) गीतायाम् (ख) गीतासु

(ग) गीताभ्यः (घ) गीतायै

37. सप्तदशे अध्याये कति श्लोकाः सन्ति?

(क) अष्टाविंशतिः (ख) अष्टादश

(ग) अष्टात्रिंशत् (घ) पञ्चदश

38. विश्वरूपदर्शनयोगः कस्मिन् अध्याये वर्णितः?

(क) पञ्चदशे अध्याये (ख) अष्टमे अध्याये

(ग) एकादशे अध्याये (घ) दशमे अध्याये

39. यः कर्मफलं अनाश्रितःकार्यं कर्म करोति सः कः?

(क) सन्न्यासी (ख) संहर्ता

(ग) असुरः (घ) भोक्ता

40. श्रद्धावान् किं लभते

(क) धनम् (ख) धान्यम्

(ग) वाहनम् (घ) ज्ञानम्

41. युयुत्सवः कुत्र समवेताः?

(क) तीर्थक्षेत्रे (ख) अर्थक्षेत्रे

(ग) अधर्मक्षेत्रे (घ) कुरुक्षेत्रे

42. भगवान् इति पदेन कः कीर्त्यते?

(क) श्रीकृष्णः (ख) चतुर्थे

(ग) पञ्चदशे (घ) नवमे

43. तस्माद् अपरिहार्ये अर्थे न त्वं शोचितुमर्हसि इत्यत्र त्वम् इति पदेन कः उक्तः?

(क) श्रीकृष्णः (ख) अर्जुनः

(ग) सञ्जयः (घ) भीमः

44. ..... तेन गन्तव्यं ब्रह्मकर्मसमाधिना?

(क) अग्निना (ख) वायुना

(ग) दिव्येन (घ) ब्रह्मैव

45. वासुदेवः कः?

(क) वसुदेवस्य पुत्रः (ख) वसुदेवस्य अनुजः

(ग) अर्जुन (घ) वसुदेवस्य पौत्रः

46. पर्युपासते इत्यत्र सन्धिविच्छेदः-

(क) पर्य+उपासते (ख) परि+उपासते

(ग) पर्युपा+सते (घ) पर्यु+पासते

47. कौन्तेयः कः?

(क) अर्जुनः (ख) श्रीरामः

(ग) बलरामः (घ) दुर्योधनः

48. ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुः.....?

(क) विकार्यम् (ख) अनिवार्यम्

(ग) अव्ययम् (घ) अनव्ययम्

49. षष्ठम् इन्द्रियं किम्?

(क) मनः (ख) घ्राणम्

(ग) चक्षुः (घ) श्रोत्रम्

50. कूटस्थः कः उच्यते?

(क) भूतम् (ख) क्षरः

(ग) अक्षरः (घ) शरीरम्